सर्व्वतोभद्रचक्रस्य रूपं यथा ।

पूर्व्व

उत्तर

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| अ | ३ | ४ | ५ | ६ | ७ | ८ | ९ | आ |
| २ | उ | अ | व | क | ह | ड | ऊ | १० |
| १ | लृ | ऌ | वृषः | मिथुनः | कर्क्कटः | ॡ | म | ११ |
| २७ | च | मेषः | ओ | नन्दा | औ | सिंहः | ट | १२ |
| २६ | द | मीनः | रिक्ता | पूर्णा | भद्रा | कन्या | प | १३ |
| २५ | झ | कुम्भः | अः | जया | अं | तुला | र | १४ |
| २४ | ग | ऐ | मकरः | धनुः | वृश्चिकः | ए | त | १५ |
| २३ | ऋ | ख | ज | भ | य | न | ॠ | १६ |
| ई | २२ | ० | २१ | २० | १९ | १८ | १७ | इ |

दक्षिण

पश्चिम

सर्व्वतोभद्रः, पुं, सर्व्वतो (भद्रमस्येति) निम्ब-वृक्षः । इत्यमरः ।२।४।६२॥ व्यूहविशेषः । इति तट्टीका ॥ विष्णुरथः । इति शब्दरत्नावली । वंशः । इति शब्दचन्द्रिका ॥ चित्रकाव्यविशेषः। इति मेदिनी ॥

तदुदाहरणं यथा ।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| स | का | र | ना | ना | र | का | स |
| का | य | सा | द | द | सा | य | का |
| र | सा | ह | वा | वा | ह | सा | र |
| ना | द | वा | द | द | वा | द | ना |

इति सर्व्वतोभद्रः । इति माघे । १९ । २७ ॥ अस्यार्थः । "सकारेति । पुनः कीदृशी ।
'कारो वधे निश्चये च बले यत्ने रतावपि ।'
इति विश्वः ॥
सकाराः सयत्नाः सोत्साहाः नाना नाना-विधाश्च ये आराः अरीणां समूहाः । भिक्षादि-भ्योऽण् । तेषां कासा गतिभेदाः काया विग्र-हाश्च तेषां सादं ददतीति साददाः नाश-कारकाः सायका यस्यां सा तथोक्ता । रवेन रागेणाहवो यस्याः सा रसाहवा रणरागिणी-त्यर्थः । वाहसाराणां वाहश्रेष्ठानां ये नादा हेषादिघोषास्तेषां वादं कलहं ददतीति वाद-दानि । तैः सह कलहायमानानि वादनानि वाद्यानि यस्यां सा वाहसारनादवाददवादना तूर्य्यवादघोषेत्यर्थः । अतएव तेषां तुल्यतोक्त-रतिशयोक्तिः । सर्व्वतो भ्रमणात् सर्व्वतो-भद्राख्यश्चित्रबन्धः । अत एव दण्डी ।
'तदिदं सर्व्वतोभद्रं भ्रमणं यदि सर्व्वतः ।' इति।
उद्धारस्तु । चतुःकोष्ठे चतुरङ्गबन्धे पंक्तिचतुष्टये पादचतुष्कं विलिख्यानन्तरं पङ्क्तिचतुष्टये-ऽप्यधःक्रमेण पादचतुष्टयलेखने प्रथमासु चतसृषु प्रथमपादः सर्व्वतो वाच्यते । एवं द्वितीयादिषु द्वितीय इत्यादि ।" इति तट्टीकायां मल्लिनाथः॥ ( वटिकौषधविशेषः । यथा,—
"विशुद्धं गगनं ग्राह्यं द्विकर्षं शुद्धगन्धकम् ।
तोलकं तोलकार्द्धञ्च हिङ्गुलोत्थरसन्तथा ॥
कर्पूरं केशरं मांसी तेजपत्रं लवङ्गकम् ।
जातीकोषफलञ्चैव सूक्ष्मैलाकरिपिप्पली ॥
कुष्ठं तालीशपत्रञ्च धातकी चोचमुस्तकम् ।
हरीतकी मरिचञ्च शृङ्गवेरविभीतकम् ॥
पिप्पल्यामलकञ्चैव शाणभागं विचूर्णितम् ।
सर्व्वमेकीकृतं पिष्ट्वा वटीकुर्य्याद्द्विगुञ्जिकाम् ॥
भक्षयेत् पर्णखण्डेन मधुना सितयापि वा ।
रोगं ज्ञात्वानुपानञ्च प्रातः कुर्य्याद्विचक्षणः ॥
हन्ति मन्दानलान् सर्व्वानामदोषं विसूचिकाम्
पित्तश्लेष्मभवं रोगं वातश्लेष्मभवन्तथा ॥
आनाहं मूत्रकृच्छ्रञ्च संग्रहग्रहणीं वमिम् ।
अम्लपित्तं शीतपित्तं रक्तपित्तं विशेषतः ।
चिरज्वरं पित्तभवं धातुस्थं विषमज्वरम् ॥
कासं पञ्चविधं हन्ति कामलां पाण्डुमेव च ।
सर्व्वलोकहितार्थाय शिवेन भाषितः पुरा ।
सर्व्वतोभद्रनामायं रसः साक्षान्महेश्वरः ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे ज्वराधिकारे ॥
"सूतं तपनगगनं कान्तलौहस्य चूर्णं
कृत्वैकस्मिन् दृशदि पिषित शृङ्गवेरस्य धारा ।
गुञ्जाद्रोगी यकृतिगुदजे शोफि सर्व्वज्वरेषु
शोथे पाण्डौ कृमिकृतगदे सर्व्वतः कामलायाम्
कासे श्वासे प्रमिहजठरे सर्व्वदोषप्रभूते
ख्यातो योगः सुरमणिकृतः सर्व्वरोगैकहन्ता ॥"
इति च रसेन्द्रसारसंग्रहे शोथाधिकारे ॥ )
सर्व्वतोभद्रा, स्त्री, ( सर्व्वतो भद्रं मङ्गलमस्या इति । ) गम्भारी । नटयोषित् । इति मेदिनी ॥
सर्व्वतोमुखं, क्ली, (सर्व्वतो मुखमस्येति ।) जलम् । इत्यमरः ।१।१०।४॥ आकाशम् । इति मेदिनी ॥ (समन्ततोमुखविशिष्टे, त्रि । यथा, महाभारते । १ । २११ । १२ ।
"एवं सर्व्वान् समादिश्य पूर्व्वतीरे महोदधेः ।
क्रूरां मतिं समास्थाय जग्मतुः सर्व्वतोमुखौ ॥"
सर्व्वतोमुखः, पुं, (सर्व्वतः मुखमस्येति ।) शिवः ॥ ( यथा, महाभारते । १३ । ३७ । ६६ ।
"सर्व्वकामवरश्चैव सर्व्वदः सर्व्वतोमुखः ॥" )
ब्रह्मा । ( यथा, कुमारे । २ । ३ ।
"अथ सर्व्वस्य धातारं ते सर्व्वे सर्व्वतोमुखम् ।
वागीशं वाग्भिरर्थ्याभिः प्रणिपत्योपतस्थिरे ॥")
आत्मा । इति मेदिनी ॥ ( विष्णुः । यथा, महाभारते । १३ । १४९ । १०० ।
"अमृतांशोऽमृतवपुः सर्व्वज्ञः सर्व्वतोमुखः ॥")
ब्राह्मणः । इति शब्दरत्नावली ॥ स्वर्गः । इति शब्दमाला ॥ अग्निः । यथा,—
"सर्व्वतः पाणिपादान्तः सर्व्वतोऽक्षिशिरोमुखः
विश्वरूपो महानग्निः प्रणीतः सर्व्वकर्म्मसु ॥"
इति तिथ्यादितत्त्वधृताग्निप्रणयनमन्त्रः ॥
सर्व्वत्र, व्य, (सर्व्वस्मिन्निति । सर्व्व + 'सप्तम्यास्त्रल् । ५ । ३ । १० । इति त्रल् ।) सर्व्वदिग्देशकाले । इति शब्दरत्नावली ॥ (यथा, रघुः । ३ । ६२ ।
"तुतोष वीर्य्यातिशयेन वृत्रहा
पदं हि सर्व्वत्र गुणैर्निधीयते ॥" )
सर्व्वत्रगः, पुं, (सर्व्वत्र गच्छतीति । गम + "उपक्र-रणे सर्व्वत्रपन्नयोरुपसंख्यानम् ।" ३।२।४८। इत्यस्य वार्त्तिकोक्त्या डः । ) वायुः । सर्व्वत्र-गामिनि, त्रि । इति वक्ष्यमाणशब्ददर्शनात् ॥ ( यथा, गीतायाम् । ८ । ६ ।